Roll No. ........................... Total Printed Pages -4

# F - 947

## M.A.(Classics) (Fourth Semester)
## EXAMINATION, May - June, 2022
## साहित्यम्
## वैकल्पिक
## (Paper Seventh)

*Time : Three Hours]* *[Maximum Marks:80*

**सूचना - सर्वे प्रश्नाः समाधेयाः।**

1. कयोश्चित द्वयोः श्लोकयोः सप्रसंगं व्याख्या विधेया- **20**

(i) कान्तारभाजि मयि केकयराजपुत्र्याः,
कार्कश्यकन्दलितया दलितस्य वाचा।
तातस्य शोकदहनग्लपितं शरीरं,
मातास्त्वया न तु कदाचिदुपेक्षणीयम्।।





(ii) प्राचीनं व्यसनं सुरेन्द्रतनयाज्जातं वने भ्राम्यतः,
सुग्रीवस्य निराकृतं खररिपोर्वाणेन सालच्छिदा।
अद्यास्य व्यसनं तु पञ्चविशिखादासीदुपेन्द्रात्मजा-
त्सौमित्रे तदपि प्रशान्तमभवज्ज्याघोषमात्रेण ते।।

(iii) रजनिचरमभागे वारसीमन्तिनीनां
करतलकलिताभिर्दीपिका मार्जनीभिः।
दिशि दिशि परिमृष्टं यत्तमस्तत्समस्तं,
हृदयभवजगाहे केवलं रावणस्य।।

(iv) श्रेयः पदात्पदमुपैति विधेः प्रसादा-
त्प्रायस्तदद्य फलितं हि बिभीषणे तु।
रेखातपत्रसहितं पदमस्य गृह्ण-
न्नेकातपत्रसहितं पदभेष भेजे।।

2. कस्यचिदेकस्य गद्यस्य संदर्भ प्रसंग-सहिता व्याख्या कुरुत- **10**

(i) ततः परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्यलोकेऽपि स्ववृत्तं प्रकाशयितुं किल भवन्तमेबोपतिष्ठ मानयानया भारत्या रामचरितं यथाश्रुतं व्याक्रियतामिति व्याहृत्यान्तरघात्। एनं प्रबन्धं प्रयोक्तुं कः समर्थ इति चिन्तामुपगतवति सति भगवति वाल्मीकौ। एनौ मुनिः परिगृह्य स्वां कृतिमपाठयत्। तौ पुनरितस्ततो गायमानौ दृष्ट्वा रामः प्रहृष्टमनाः स्वभवनमानीय भ्रातृभिः परिवृतो निजचरितं गातुमन्वयुङ्क्त।

(ii) ततस्तीक्ष्णतरप्रहरणगवाक्षितवक्षसा रक्षसा नपरित्यक्तेषु प्राणेषु पराक्रमाविषयपराक्रमौ प्राक्रमेतामेतौ तदङ्गगलित-रूधिरधारासेकेन खननक्षमायां काननक्षमायां राक्षसशवोचितमवटमतिविशङ्कटमुत्पादयितुं। तत्क्षणमेव क्षणदाचरोऽपि संजातप्रत्यभिज्ञो रामाय व्यजिज्ञपत्।

आत्मनो गन्धर्वकुलसंभवं रम्भापरिरम्भणारम्भसंरम्भं तच्छ्रवणकुपितवैश्रवणदत्तां रक्षोरूपिणीं शापव्यापदं तस्यास्तथाविधमवसानं च।

(iii) वानरसेना कथं तरेदिममन्तरायं वितन्वन्तमुदन्वन्तम् तरतुनाम, कथमुपयातु यातुधानराजधानीमिमाम् सर्वथा वितथमनोरथो दाशरथिः, मोघीकृतार्णवलङ्घनः केवलमहमभवम् जीविता वा न वेति न जानामि जानकीति तत्र भगवतीं सीताभवजिगमिषुराज्जनयेः प्रच्छन्नसंचाररहे तोरस्यमयं गभस्तिमालिनः केवलममिललाष। तदनु शातमखस्यागस्त्यसंनिधौ निक्षिप्तचापस्य प्रत्यासीदति प्रयोजनवेलेति प्रचेतसे कथयितुमिव प्रतीचीं दिशं प्रविशति भगवति भास्वति।

3. संस्कृतसाहित्ये चंपूकाव्यस्य स्थानं प्रतिपादनीयम् **10**

**अथवा**

महाकवेः भोजस्य वैशिष्ट्यं विवेचनीयम्।

4. कयोश्चिद् द्वयोः कारिकयोः व्याख्या विधेया- **20**

(i) घटतीति घटो ज्ञेयो नाघटन् घटतामियात्।
अघटत्वाविशेषेण पटोऽपि स्याद् घटोऽन्यथा।।





(ii) पदवाक्यादिगम्यत्वाद् स चार्थो बहुधा मतः।
अन्यथैवोच्यते सोऽर्थः सा वक्रोक्तिरुदाहृता।।

(iii) अतोऽतदात्मभूतस्य येडभावं जगदुर्ध्वनेः।
ते मुधैव प्रतिक्षिप्ताः स्वोक्तिभावमपश्यता।।

(iv) शब्दस्यैकाभिधा शक्तिरर्थस्यैकैव लिंगता।
न व्यञ्जकत्वमनयोः समस्तीस्त्युपपादितम्।।

5. कस्यचिदेकस्य व्याख्या विधेया- **20**

(i) रसादीनां प्राधान्ये यथा कुमारसंभवे मधुप्रसंगे-वसन्तपुष्पाभरणं वहन्त्या देव्या आगमनादिवर्णने मनोभव-शरसन्धानपर्यन्ते, शम्भोश्च विवृत्तधैर्यस्य चेष्टाविशेषवर्णनादौ।

(ii) द्वितीयपक्षपरिग्रहे पुनर्ध्वनेरेवेदं लक्षणमनया भङ्ग्यामिहितं भवति, अभिन्नत्वाद् वस्तुनः। अत एव चास्य त एव प्रभेदास्तान्येवोदाहरणानि तैरुपदर्शितानि। तच्चायुक्तमित्युक्तं, वक्ष्येत च।

(iii) एवं कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम् 'इत्यादाव वगन्तव्यम्। अविनाभावावसायपूर्विका ह्यन्यतोऽन्यस्य प्रतीतिरनुमानमित्यनुमानलक्षणमुक्तम् तच्चात्रोपलभयत एव।